# ऐमिटी संस्कृतसौगन्धिका प्रथमा-संस्कृतपत्रिका
## सम्पादकः संस्कृतविभागः
## (ऐमिटी अन्ताराष्ट्रियविद्यालयः मयूरविहारः )

### विशिष्टाकर्षणम्

- बालानां लेखाः
- प्रेरणाप्रदकथाः
- संस्कृतसङ्कल्पः
- बालकथाः
- साक्षात्कारः
- प्रार्थनासभा
- उपलब्धयः
- विश्वशान्तिमन्त्रः




सुरससुबोधा विश्वमनोज्ञा
ललिता हृद्या रमणीया ।
अमृतवाणीसंस्कृतभाषा
नैव क्लिष्टा न च कठिना ॥

पञ्चाङ्गः विक्रमी संवत् (पिङ्गल) २०८० कार्तिकमासशुक्लपक्षः द्वितीयातिथिः ज्येष्ठानक्षत्रः सुकर्मायोगः कार्तिकमासः प्रविष्टे २७ तदानुसारम् १५ नवम्बरः २०२३



डा. अमीताचौहानमहोदया

**आत्मीय बान्धवाः !**

अयं कालः संस्कृतकालरूपेण दृश्यमानो वर्तते।यतोहि सर्वत्र नूतनाः अविष्काराः सम्पूर्णेपि विश्वे यत्र कुत्रापि दृश्यन्ते ते अविष्काराः अस्माकं वेद◌ाधारिताः एव। एतदर्थमेव अस्माकं विद्यालयः संस्कृतसेवार्थं कृतसंकल्पः वर्तते। अस्माकम् एकैव उद्देश्यं वर्तते यत् २०३० यावत् ऐमिटी विद्यालयस्य प्रत्येकः छात्रः सुसंस्कृतः, संस्कृतज्ञः च भवेत् । एतदर्थं अस्माभिः अहर्निशं परिश्रमः विधीयते भवन्तः सर्वे छात्राः संस्कृतस्य मनोयोगेन अध्ययनं कुर्वन्तु। संस्कृत पठनेन निश्चितरूपेण भवतां शारीरिक, मानसिक बौद्धिक विकासः च भविष्यति । अतः संस्कृततस्य अध्ययनं परमावश्यकम्। अतः एतदर्थं प्रस्तूयते इयं संस्कृतपत्रिका।

**धन्यवादः**

**जयतु संस्कृतम् जयतु भारतम्।**



`प्राचार्या-महोदया श्रीमती मीनूकंवरः

**विद्या समस्तास्तवदेवीभेदाः**
**स्त्रियःसमस्ताः सकला जगत्सु।**
**त्वय्यैकया पूरितमम्बमेतद्**
**का ते स्तुतिःस्तव्यपरापरोक्ति :।।**

अस्माकं महत्सौभाग्यं वर्तते यतो हि अस्माकम् अस्य विद्यालयस्य आधारभूतासंस्कृतज्ञा-संस्कृतानुरागिणी-वात्सल्यमयी-पूजनीया अध्यक्षा, डा. अमीता चौहान महोदया अस्याः संस्थायाः आत्मा वर्तते,यतोही शास्त्रेषु उद्यते ज्ञानाधिकरणम् आत्मा अतः अस्माकम् अधिकरणम् ज्ञानस्य आधारः इयमेव अस्माकं अध्यक्षा महोदया वर्तते । एतासाम अनुकम्पया एव अस्माभिः भारतीय संस्काराणां रक्षार्थं प्रयत्नः क्रियते।

**धन्यवादः**

**जयतु संस्कृतम् जयतु भारतम्।**

**सम्पादकमण्डलः**

**सम्पादकौ—**आचार्यमनमोहनपंकजौ

सहसम्पादकः - अभिजीतः पोरवालः

# आचार्यपंकजेनारब्धं सरलसंस्कृतसंभाषणशिविरम्





**ऐमिटी अन्ताराष्ट्रिय विद्यालये 2023 तमस्य वर्षस्य नवंबर मासस्य द्वितीये दिनाङ्के दशदिवसात्मकस्य सरल संस्कृत-सम्भाषण-शिविरस्य गुरुवासरे शुभारम्भो जातः। शुभारंभ कार्यक्रमेऽस्मिन् अस्य विद्यालयस्य प्रधानाचार्या श्रीमती मीनु कंवर महोदया संस्कृतस्य महत्व विषये छात्रान् सम्बोधितवति, मनसा वाचा कर्मणा च संस्कृतं पठितुम् प्रेरितवती। कार्यक्रमस्य आरम्भ: दीप प्रज्वालनेन अभवत्। कार्यक्रम संयोजिका श्रीमती सुनिता महोदयाऽपि शुभारंभ कार्यक्रमे समुपस्थिता आसीत्। तया उक्तं यत् संस्कृतं न केवलं एका भाषा अपितु एषा अस्माकं जीवन पद्धतिरेव वर्तते। अस्मिन्नेवक्रमे विद्यालयस्य संस्कृत विभागाध्यक्ष: श्रीमान् आचार्यमनमोहनशर्मा महोदयः स्वकीये भाषणे उक्तवान् यत् " भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा " अस्माकं देशस्य द्वे प्रतिष्ठे स्तः एकं संस्कृतम् अपरम् अस्माकं संस्कृतिः अतः यदि वयं भारतीय संस्कृतिं ज्ञातुमिच्छाम: चेत् संस्कृतं पठितव्यमेव।संस्कृतप्रशिक्षक: पङ्कजशर्मा प्रथमे दिवसे संस्कृतगीतम्, परिचयः, सर्वनाम शब्दाः, वस्तूनां नामानि, संबंध वाचक शब्दाः, क्रियापदानि,संस्कृत सङ्ख्यां च पठितवान्। सर्वेऽपि छात्राः उत्साह पूर्वकम् अस्मिन् वर्गे सहभागं कृतवन्तः। शिविरेस्मिन् चतुर्थी कक्षायाः नवतिः छात्राः, दशाधिक शिक्षकाः च उपस्थिताः आसन्। अस्याः कक्षाया : समापनं शान्ति मन्त्रेण आभवत्।**

**धन्यवादः**

**जयतु संस्कृतम् जयतु भारतम्।**

# संस्कृतसङ्कल्पः


पठामि संस्कृतं नित्यं
वदामि संस्कृतं सदा ।
ध्यायामि संस्कृतं सम्यक्
वन्दे संस्कृतमातरम् ॥

संस्कृतस्य प्रसाराय ।
नैजं सर्वं ददाम्यहं
संस्कृतस्य सदाभक्तौ॥
वन्दे संस्कृतमातरम्

संस्कृतस्य कृते जीवन्
संस्कृतस्य कृते यजन् ।
आत्मानमाहुतं मन्ये
वन्दे संस्कृतमातरम् ॥

# बुधस्य उपदेशः

कश्चन राजकुमारः । सः  बहु उद्दण्डः आसीत्। सः सर्वदा कटुवचन वदति अतः जनाः खिन्नाः भवन्ति स्म। महाराजः विविधैः प्रकारैः उपदेश कृतवान्। परन्तु सः बोधनेन सफलः न जातः। अन्ततः सः राजा बुद्धस्य समीपं गत्वा सर्व विषयं निवेदयति । बुद्धः उक्तवान् - "चिन्ता मास्तु, तं मम समीपं प्रेषयतु" इति। राजकुमारः बुद्धस्य दर्शनार्थ गतवान् बुद्धः उक्तवान्- "मम पुरतः पत्राणि सन्ति। तानि भवान् भक्षयतु" इति। राजकुमारः खादितवान्। तानि पत्राणि तिक्तानि आसन् ।




अतः कोपेन सः वृक्षम् एव छिन्नवान् । बुद्धः पृष्टवान्" -भवान् किमर्थम् एवं कृतवान् "?राजकुमारः उक्तवान्"एषः विषवृक्षः न वर्धनीयः अतः एवं कृतवान्।' महात्मा मन्दं हसन् बोधितवान् भवान् अपि जनानां निन्दां करोति । अतः अग्रे भवन्तम् अपि जनाः मारयितुम् आगच्छेयुः । तदा भवतः का गतिः भवेत् ?एतद्विषये भवान् चिन्तितवान् किम् "?इति । एतद् वचनं श्रुत्वा राजकुमारः स्वस्य दोषं ज्ञातवान् । बुद्धं क्षमां याचितवान् । तदनन्तरं जनानां सेवार्थं जीवनं यापितवान् च ।

अभिजितपोरवाल:

कक्षा नवमी वर्ग: स

# रामायणस्य अश्रुता कथा

**यदा** श्रीरामः ,सीता लक्ष्मणश्च वनवासं प्रति गच्छन्तः आसन् तदा उर्मिला (लक्ष्मणस्य भार्या) अपि तैः सह गन्तुम् इष्टवती। परन्तु लक्ष्मण: तां निवारितवान् अतः उर्मिला अयोध्यायामेव स्थितवती। वनवासकाले उर्मिला रामसीतायाः लक्ष्मणस्य च रक्षणार्थं दिवारात्रौ जागरणं कृतवती। अतः सा चतुर्दशवर्षाणि यावत्



निद्रादेव्या: उपेक्षां कर्तुं प्रार्थितवती। निद्रादेवी उर्मिलां पृष्टवती किम् सा लक्ष्मणस्य निद्रां स्वीकर्तुं शक्नोति वा, तदा सा अङ्गिकृतवती। उर्मिलायाः कारणेन लक्ष्मण: मेघनादं जेतुं शक्तवान्। यतोहि मेघनाद: वरं प्राप्तवान् यत् यः निद्रां सैव माम् पराजयितुं शक्नोति।

**प्रत्युषकुमार:साहू**

**कक्षा - अष्टमी वर्ग: द**

# चतुरः वृद्धः

**कश्चन** वृद्धः  एकदा तस्य बुभुक्षा जाता। समीपे एव एकः आम्रवृक्षः आसीत् । सः वृद्धः आम्रवृक्षस्य समीपम् गतवान्। वृक्षे बहूनि फलानि आसन्।

सः चिन्तितवान् - "अहं तु वृद्धः । मम शरीरे शक्तिः नास्ति । वृक्षः उन्नतः अस्ति । कथम् उपरि





गच्छामि ? कथं फलानि प्राप्नोमि ?" इति वृक्षस्य उपरि वानराः आसन् । अनन्तरं वृद्धः एकम् दः उपायं कृतवान्। सः पाषाणखण्डान् उन्नीतवान् । ने वानराणाम् उपरि शिलाखण्डान् क्षिप्तवान्। तेन कारणेन वानराः कुपिताः अभवन्। अतः ते वानराः फलानि क्षिप्तवन्तः । वृद्धः तानि फलानि - स्वीकृतवान् । अनन्तरं सन्तोषेण खादितवान् ।

**अश्रितदासः**

**कक्षा नवमी वर्गः द**

# सकरदीपं समागताः मशकाः

**एकस्य** वृक्षस्य अधः मित्रद्वयं शयनं करोति स्म। किञ्चितकालान्तरं मशकाः दशनम् आरब्धवन्तः । तेन द्वौ अपि बहु कष्टम् अनुभूतवन्तौ ।



अनन्तरं द्वौ अपि अन्यस्य वृक्षस्य अधः गत्वा शयन कृतवन्तौ । किंञ्चित् कालान्तरं तत्र केचन खद्योताः भ्रमणम् आरब्धवन्तः ।तदा एकः अपरं मित्रं प्रति वदति - "पश्यत भोः एते मशकाः कीदृशाः वराकाः सन्ति । तत्रापि दशनं कुर्वन्ति स्म अत्रापि एते करदीपान् स्वीकृत्य दशनार्थम् अन्वेषणं कुर्वन्ति ।" इति ।

**आद्या गर्ग**

**कक्षा दशमी वर्गः स**

# मूढ: सेवक:

**कश्चन** महाराजः आसीत् । तस्य महाराजस्य अत्यन्तं प्रियः कश्चन वानरः सेवकः आसीत् । सः वानरः महाराजस्य विशाले राजप्रासादे सर्वत्र गमनागमनं करोति स्म ।एकदा महाराजः निद्रां करोति स्म। तस्मिन् समये वानरः तत्र आगतः । सः महाराजस्य समीपं गत्वा हस्तव्यजनेन वीजनम् आरब्धवान् ।

तदा एव महाराजस्य नासिकायां काचित् मक्षिका उपविष्टा। वानरः हस्तव्यजनेन तां मक्षिकां दूरीकर्तुं बहुवारं प्रयत्नं




कृतवान् । तथापि सा मक्षिका पुनः पुनःआगत्य महाराजस्य नासिकायाम् उपविशति स्म । तदा सः चपलः वानरः कुपितः जातः । सः खड्ग स्वीकृतवान् । अत्यन्तं तीक्ष्णेन खड्गेन सः वानरः मक्षिकायाः उपरि प्रहारं कृतवान् । मक्षिका तु उड्डीय ततः गता। परन्तु खड्गप्रहारेण महाराजः मृतः अभवत् ।


**आशयः - विवेकवान् सेवकः एव अपेक्षितः ।**

भाविनी झा

कक्षा दशमी वर्ग: द

# आयोजनम्   यूथ आइडियाथॉन)   Youth Ideathon 2023)







**ऐमिटी अन्ताराष्ट्रियविद्यालयः मयूर विहार इत्यनेन १९ नवम्बर् २०२३ दिनाङ्के आई आई टी देहली इत्यत्र Youth Ideathon 2023 इत्यस्मिन् स्वप्रतिभां प्रदर्शयितुं अवसरः प्राप्तः। सप्तमवर्गस्य छात्राः कृत्रिमबुद्धिविषये स्वस्य परियोजनां प्रस्तुतवन्तः, यस्याः निर्णायकमण्डलेन अतीव प्रशंसा कृता, यस्य कृते छात्राणां कृते रजतपदकं प्रमाणपत्रं च प्रदत्तम् ।**

## केन्द्रीय माध्यमिक शिक्षा बोर्ड’ इत्यनेन आयोजितशतरंजस्पर्धा



सीबीएसई क्षेत्रीय शतरंज स्पर्धा २०२३ इत्यस्य आयोजनं बाल भवन पब्लिक विद्यालये मयूर विहार फेज २ इत्यत्र १९-२१अक्टूबर २०२३ पर्यन्तं अभवत्

ऐमिटी मयूर विहार विद्यालयस्य बालिकादलेन द्वितीयविजेता पुरस्कारः, बालकदलेन, बालकदलेन च १०० विद्यालयेषु १० स्थानं प्राप्तम्। अस्मिन् स्पर्धायां षष्ठी कक्षायाः छात्रः कार्तिकेयः त्यागी अपराजितः एव न अभवत्, सः बोर्ड नम्बर ४ इत्यस्मिन् सर्वासु प्रतियोगितासु विजयी अभवत्।

**मयूरविहारस्य ऐमिटी अन्ताराष्ट्रिय विद्यालयस्य विद्यालयसभागारे २०२३ तमस्य वर्षस्य डिसेम्बर् मासस्य २ दिनाङ्के तृतीयवर्गस्य प्रस्तुतिः आयोजिता, यस विषयः "बाजरा उत्सवः" इति आसीत्।**






## विश्वशान्तिःमन्त्रः

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामया।**
**सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग् भवेत्।।**
**जयतु संस्कृतम् जयतु भारतम्।**

## धन्यवादः

## ॐ शान्तिः शान्तिः शान्तिः